# Shri Ambikashtakam

# શ્રીઅમ્બિકાષ્ટકમ્

## Document Information

Text title : ambikAShTakam

File name : ambikAShTakam.itx

Category : devii, devI, jaina, aShTaka

Location : doc_devii

Proofread by : DPD

Latest update : March 30, 2019

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 16, 2023

*sanskritdocuments.org*

# શ્રીઅમ્બિકાષ્ટકમ્

વ્યાલોલાલમ્બમાનપ્રવણરણઝત્કિઙ્કિણીક્વાણરમ્યં
ધ્વસ્તધ્વાન્તં સમન્તાન્મણિકિરણગણાડમ્બરોલ્લાસિતેન ।
દેવી દિવ્યાંશુકાનાં ધ્વજપટપટલૈઃ શોભમાનં વિમાનં
લીલારૂઢા ભ્રમન્તી ભુવનકૃતનતિઃ પાતુ મામમ્બિકા સા ॥ ૧॥

યા દેવી દિવ્યદામાઞ્ચિતચિકુરભરામોદમુગ્ધાલિમાલા-
ભાસ્વન્માણિક્યમાલામિલદમલમહોમણ્ડલીમણ્ડિતાઙ્ગા ।
સન્મુક્તાતારહારૈર્ગગનતલગતાસ્તારકાસ્તર્જયન્તી
વજ્રાલઙ્કારભાસા હસિતરવિકરા પાતુ મામમ્બિકા સા ॥ ૨॥

યા કૌબેરં વિહાય સ્વપતિપરિભવાત્સાધુદાનપ્રરૂઢાત્
સ્થાનં શ્રાન્તાતિમાર્ગે શ્રમશમનકૃતે સંશ્રિતા ચૂતવૃક્ષમ્ ।
ક્ષુત્ક્ષામૌ વીક્ષ્ય પુત્રૌ કૃતસુકૃતવશાત્પ્રાર્થયન્તી ફલાનિ
ક્ષિપ્રં સંપ્રાપ તાનિ સ્વચરિતમુદિતા પાતુ મામમ્બિકા સા ॥ ૩॥

દેવી યાઽત્રોપવિષ્ટા સરણિગતપતિં વીક્ષ્ય કમ્પં દધાના
સ્મૃત્વા શ્રી રૈવતાદ્રિં વ્યવસિતમરણા સાધધર્મં સ્મરન્તી ।
આરુહ્યોત્તુઙ્ગશ◌ૃઙ્ગં પ્રપતનવિધિના દિવ્યદેવત્વમાપ્તા
જૈનેન્દ્રે પાદપીઠે સતતનતશિરાઃ પાતુ મામમ્બિકા  સા ॥ ૪॥

યા પશ્ચાત્તાપતપ્તં ગતમદમદનં દુષ્કૃતં સ્વં સ્મરન્તી
દંષ્ટ્રાસ્યં પિઙ્ગનેત્રં ખરનખરકરં કેસરાલીકરાલમ્ ।
પુચ્છાચ્છોટપ્રકમ્પાવનિવલયતલં દિવ્યસિંહ સ્વકાન્તં
સંરૂઢા યાતિ નિત્યં જિનપતિનિલયે પાતુ મામમ્બિકા સા ॥ ૫॥

સાન્દ્રામ્રાલુમ્બિહસ્તા તરલહરિગતા બાલકાભ્યામુપેતા
ધ્યાતા યા સિદ્ધકામૈર્વિઘટિતડમરા સાધકેર્ભક્તિયુક્તઃ ।
રક્તા રાગાનુરક્તૈઃ સ્ફટિકમણિનિભા ક્લેશવિધ્વંસધીભિઃ
પીતા વશ્યાનુભાવૈર્વિહિતજનહિતા પાતુ મામમ્બિકા સા ॥ ૬॥

દેવી વિદ્યાધરેન્દ્રાસુરસુરમનુજૈર્વન્દ્યપાદારવિન્દા
    પ્રત્યૂહાન્નિક્ષિપન્તી ક્ષપિતકલિમલા બિભ્રતી વિશ્વરક્ષામ્ ।
જૈનેન્દ્રં શાસનં યા પ્રકટયતિ મહોત્સાહશક્ત્યા સ્વભક્ત્યા
    નિત્યં નામ્ના નરાણાં વિશદશિવફલા પાતુ મામમ્બિકા સા ॥ ૭॥

એવં વૃત્તાષ્ટકેન સ્તુતિમુખરમુખઃ સંસ્તુતિં યઃ કરોતિ
    ધ્યાનાધીનાન્તરાત્મા પ્રશમમુપગતો નિત્યમેકાગ્રચિત્તઃ ।
પ્રાતર્મધ્યે નિશાયાં શયનતલગતો યત્ર કુત્રાપિ સંસ્થો
    દેવી તસ્ય પ્રકામં પ્રકટયતિ પટુ પ્રૌઢમમ્બા પ્રસાદમ્ ॥ ૮॥

ઇતિ શ્રીઅમ્બિકાષ્ટકં સમ્પૂર્ણમ્ ।

Proofread by DPD

*Shri Ambikashtakam*
pdf was typeset on September 16, 2023

Please send corrections to *sanskrit@cheerful.com*